# चतुर्थः पाठः। विध्यर्थमाला। (कण्ठस्थीकरणार्थम्)

सुभाषितानि संस्कृतभाषायाः वैशिष्ट्यपूर्णानि पद्यरत्नानि। सुभाषितानि अस्माकं मनः रञ्जयन्ति, अस्माकं ज्ञानं वर्धयन्ति, कथं व्यवहारः करणीयः, किं कर्तव्यं, किं च न करणीयम् इति सम्यक् बोधयन्ति।

**सुखार्थी चेत् त्यजेद्विद्यां विद्यार्थी चेत् त्यजेत्सुखम्।**
**सुखार्थिनः कुतो विद्या कुतो विद्यार्थिनः सुखम्॥१॥**

[ सुखार्थी चेत् विद्यां **त्यजेत्**। विद्यार्थी चेत् सुखं **त्यजेत्**। सुखार्थिनः विद्या कुतः ? विद्यार्थिनः सुखं कुतः ?]

**दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेत् जलम्।**
**सत्यपूतां वदेत् वाणीं मनःपूतं समाचरेत्॥२॥**

[ दृष्टिपूतं पादं **न्यसेत्**। वस्त्रपूतं जलं **पिबेत्**। सत्यपूतां वाणीं **वदेत्**। मनःपूतं **समाचरेत्**।]

**धनमलब्धं काङ्क्षेत, लब्धं रक्षेत् प्रयत्नतः।**
**रक्षितं वर्धयेत् सम्यक्, वृद्धं तीर्थेषु निक्षिपेत्॥३॥**

[अलब्धं धनं **काङ्क्षेत**। लब्धं (धनं) प्रयत्नतः **रक्षेत्**। रक्षितं (धनं) सम्यक् **वर्धयेत्**। वृद्धं (धनं) तीर्थेषु **निक्षिपेत्**।]

**अक्रोधेन जयेत् क्रोधम् असाधुं साधुना जयेत्।**
**जयेत् कदर्यं दानेन जयेत् सत्येन चानृतम्॥४॥**

[अक्रोधेन क्रोधं **जयेत्**। साधुना असाधुं **जयेत्** । दानेन कदर्यं **जयेत्**। सत्येन च अनृतं **जयेत्** ।]

**दुःखे दुःखाधिकान् पश्येत् सुखे पश्येत् सुखाधिकान्।**
**आत्मानं शोकहर्षाभ्यां शत्रुभ्यामिव नार्पयेत्॥५॥**

[दुःखे दुःखाधिकान् **पश्येत्**। सुखे सुखाधिकान् **पश्येत्**। (मानवः) शत्रुभ्याम् इव शोकहर्षाभ्याम् आत्मानं न**अर्पयेत्**।]

**प्रत्यहं प्रत्यवेक्षेत नरश्चरितमात्मनः।**
**किन्नु मे पशुभिस्तुल्यं किन्नु सत्पुरुषैरिति॥६॥**

[नरः आत्मनः चरितं प्रत्यहं **प्रत्यवेक्षेत** किं नु मे (चरितं) पशुभिः तुल्यम्? किं नु (मे चरितं) सत्पुरुषैः (तुल्यम्) इति।]

**बकवच्चिन्तयेदर्थान् सिंहवच्च पराक्रमेत्।**
**वृकवच्चावलुम्पेत शशवच्च विनिष्पतेत्॥ ७॥**

[(नृपः) बकवत् अर्थान् **चिन्तयेत्** सिंहवत् च **पराक्रमेत्**। वृकवत् **अवलुम्पेत** शशवत् च **विनिष्पतेत्**।]

## भाषाभ्यासः



**श्लोकः १–**

**१) एकवाक्येन उत्तरत।**

(अ) विद्यार्थी किं त्यजेत् ?

(आ) सुखार्थी किं त्यजेत्?

**२. सन्धिविग्रहं कुरुत।**

१) त्यजेद्विद्याम्　　२) त्यजेत्सुखम्

३) कुतो विद्या　　४) कुतो विद्यार्थिनः

**३. समानार्थकशब्दं लिखत।**

१) विद्या २) विद्यार्थी

**४. प्रश्ननिर्माणं कुरुत।**

(अ) सुखार्थी विद्यां न लभते।

(आ) विद्यार्थी सुखं न लभते।

**श्लोकः २.**

**१) एकवाक्येन उत्तरत ।**

(अ) कीदृशं जलं पिबेत् ?

(आ) कीदृशीं वाणीं वदेत् ?

**२. समानार्थकशब्दं चित्वा लिखत ।**

वाक्, पवित्रम्, ऋतम्, उदकम् ।

**३. स्तम्भमेलनं कुरुत ।**

| विशेषणम् | विशेष्यम् |
|---|---|
| दृष्टिपूतः | वाणी |
| वस्त्रपूतम् | आचरणम् |
| मनःपूतम् | पादः |
| सत्यपूता | जलम् |

**श्लोकः ३–**

**१. एकवाक्येन उत्तरत ।**

(अ) मनुजः कीदृशं धनं काङ्क्षेत ?

(आ) वृद्धं धनं कुत्र निक्षिपेत् ?

**२. क्रमानुसारं रचयत ।**

१) धनस्य रक्षणम् । (२) तीर्थेषु दानम् ।

(३) धनस्य इच्छा । (४) धनस्य वर्धनम् ।

**३. पदपरिचयं लिखत ।**

| | मूलधातुः | लकारः | पुरुषः | वचनम् |
|---|---|---|---|---|
| काङ्क्षेत | | | | |
| रक्षेत् | | | | |
| निक्षिपेत् | | | | |

**श्लोकः ४ –**

**१. एकवाक्येन उत्तरत ।**

अ) क्रोधं केन जयेत् ?

आ) दानेन किं जयेत् ?

इ) सत्येन किं जयेत् ?

**२. विरुद्धार्थकशब्दं लिखत ।**

क्रोधः, असाधुः, सत्यम्, दानम् ।

**३. श्लोकात् तृतीयान्तपदानि चित्वा लिखत ।**

**४. सन्धिविग्रहं कुरुत ।** चानृतम् ।

**श्लोकः ५ –**

**१) एकवाक्येन उत्तरत ।**

अ) दुःखे कान् पश्येत् ?

आ) सुखाधिकान् कदा पश्येत् ?

**२. सन्धिविग्रहं कुरुत ।**

शत्रुभ्यामिव, नार्पयेत् ।

**३ विरुद्धार्थकशब्दं लिखत ।**

सुखम्, अधिकम्, शोकः, शत्रुः ।

**४) जालरेखाचित्रं पूरयत ।**

[ ] — विधिलिङ्-क्रियापदानि — [ ]

**श्लोकः ६ –**

**१) एकवाक्येन उत्तरत ।**

अ) प्रत्यहं किं प्रत्यवेक्षेत ?

आ) चरितं केन तुल्यं माऽस्तु ?

इ) चरितं केन तुल्यम् अस्तु ?

**२. सन्धिं कुरुत ।**

अ) पशुभिः + तुल्यम् आ) किम् + नु

इ) सत्पुरुषैः + इति ई) नरः + चरितम्

**३ समानार्थकशब्दानां युग्मं चिनुत ।**

| | |
|---|---|
| अ | प्रत्यहम् , नरः, चरितम्, पशुः, तुल्यः, सत्पुरुषाः |
| आ | वर्तनम्, मृगः, प्रतिदिनम्, मनुजः, सज्जनाः, समः |

**श्लोकः ७ –**

**१. एकवाक्येन उत्तरत ।**

अ) नृपः अर्थान् कथं चिन्तयेत् ?

आ) नृपः कथं पराक्रमेत् ?

इ) नृपः कथम् अवलुम्पेत ?

ई) नृपः कथं विनिष्पतेत् ?

**२. लिङ्लकारस्य क्रियापदानि चिनुत ।**

**३. श्लोकात् पशुद्वयं चिनुत लिखत च ।**

**४. सन्धिं कुरुत ।**

अ) शशवत् + च आ) च + अवलुम्पेत

इ) चिन्तयेत् + अर्थान् ।

# क्रियापदं किं कथयति?–१

**'क्रियापदम्' इति वाक्यस्य महत्त्वपूर्णम् अङ्गम्।**

**बालकः** ग्रन्थं **पठति**। इति वाक्ये **'पठति'** इति क्रियापदम्।
तेन कस्य बोधः भवति ?

(१) पठनस्य क्रिया ✓
(२) परस्मैपदम् ✓
(३) प्रथमः पुरुषः ✓
(४) एकवचनम् ✓
(५) लट्लकारः ✓
(६) धातोः गणविकरणम् ✓
(७) कर्तुः पुरुषः वचनं च ?

**अधुना एतानि वाक्यानि पठत।**

(१) **बालकः** ग्रन्थं **पठति**।
(२) **बालकौ** ग्रन्थं **पठतः**।
(३) **बालकाः** ग्रन्थं **पठन्ति**।
(४) **अहं** ग्रन्थं **पठामि**।
(५) **त्वं** ग्रन्थं **पठसि**।

एतेषु वाक्येषु क्रियापदं कर्तृपदस्य पुरुषं वचनं च अनुसरति। यदि कर्तृपदं परिवर्तते तर्हि क्रियापदम् अपि परिवर्तते अतः कर्तृप्रधानानि वाक्यानि इमानि।


'**पठति**' इति क्रियापदस्य श्रवणेनैव कर्ता प्रथमपुरुषस्य एकवचने इति ज्ञायते। तथैव '**पठामि**' इति पदेन कर्ता उत्तमपुरुषस्य एकवचने इति स्पष्टं भवति। एवं क्रियापदेन कर्तृपदस्य पुरुषस्य वचनस्य अपि बोधः भवति।

**कर्तृवाच्यः प्रयोगः। (कर्तरि प्रयोगः)**

| कर्ता | कर्म | क्रियापदम् |
|---|---|---|
| **प्रथमा विभक्तिः** | द्वितीया विभक्तिः | **कर्तृपदस्य पुरुषवचनानुसारम्** |

(१) मधुरा सुधाखण्डान् आनयति।

मधुरा सुधाखण्डान् आनयति।





**क्रियापदं कर्तृपदम् अनुसरति।**

**अतः कर्तृवाच्यं क्रियापदम् इदम्।**

२) वयं ग्रन्थं पठामः।

वयं ग्रन्थं पठामः।




**क्रियापदं कर्तृपदम् अनुसरति।**

**अतः कर्तृवाच्यं क्रियापदम् इदम्।**